## ।। आमन्त्रणोत्सवस्तोत्रम् ।।

आमन्त्रणं ते निगमोक्तमन्त्रैस्तन्त्रप्रवेशाय मनोहराय ।
श्रीरामचन्द्राय सुखप्रदाय करोम्यहं त्वं कृपया गृहाण ।। १

सत्याधिराजार्चितपादपद्म श्रीमध्वसम्पूजितसुन्दराङ्ग ।
श्रीभार्गवीसन्नुतमन्दहास श्रीव्यासदेवाय नमो नमस्ते ।। २

अनन्तरूपैरजितादिभिश्च परादिभिश्श्रीबृहतीसहस्रैः ।
विश्वादिभिश्चैव सहस्ररूपैर्नारायणाद्यष्टशतैरजाद्यैः ।। ३

एकाधिपञ्चाशदितैश्चरूपैश्श्रीकेशवाद्यैश्च चतुस्सुविंशैः ।
मत्स्यादिभिस्स्वच्छदशस्वरूपैर्विश्वादिभिश्चाष्टभिरग्ररूपैः ।। ४

तथाऽनिरुद्धादिचतुस्स्वरूपैर्गोब्राह्मणश्रीतुलसीनिवासैः ।
मन्त्रेशरूपैः परमाणुपूर्वसंवत्सरान्तामलकालरूपैः ।। ५

ज्ञानादिदैस्स्थावरजङ्गमस्थैरव्याकृताकाशविहाररूपैः ।
नारायणाख्येन तथाऽनिरुद्धरूपेण सक्ष्मोदगतेन तुष्टैः ।। ६

प्रद्युम्नसंकर्षणनामकाभ्यां भोक्तृस्थिताभ्यां भुजिशक्तिदाभ्याम् ।
श्रीवासुदेवेन नभःस्थितेन ह्यभीष्टदेनाखिलसद्गुणेन ।। ७

अश्वादिसद्यानगतेन नित्यमारूढरूपेण सुसौख्यदेन ।
विश्वादिजाग्रद्विनियामकेन स्वप्नस्थपालेन च तैजसेन ।। ८

प्राज्ञेन सौषुप्तिकपालकेन तुर्येण मूर्ध्नि स्थितियुक्परेण ।
आत्मान्तरात्मेत्यभिधेन हृत्स्थरूपद्वयेनाखिलसारभोक्त्रा ।। ९

हृत्पद्ममूलाग्रगसर्वगैश्च रूपत्रयेणाखिलशक्तिभाजा ।
कृद्धोल्करूपैर्हृदयादिसंस्थैः प्राणादिगैरन्नमयादिगैश्च ।। १०

इलावृताद्यामलखण्डसंस्थैः प्लक्षादिसद्द्वीपसमुद्रधिष्णयैः ।
मेरुस्थकिंस्तुघ्नगकालचक्रग्रहग्रहानुग्रहिभिश्च लोकैः ।। ११

नारायणीपूर्ववधूरुरूपैस्त्रिधामभिर्भासुरधामभिश्च ।
श्रीमूलरामप्रतिमादिसंस्थश्रीरामचन्द्राखिलसद्गुणाब्धे ।। १२

सीतापते श्रीपरमावतार मायादिभिर्ब्रह्ममुखैश्च देवैः ।
दिक्पालकैस्साकमनन्तसौख्यसम्पूर्णसद्भक्तदयाम्बुराशे ।। १३

सत्याधिराजार्यहृदब्जवास श्रीमध्वहृत्पंकजकोशवास ।
मद्बिम्बरूपेण भवैक्यशाली चामन्त्रितस्त्वद्य नमो नमस्ते ।। १४

वराक्षतान् काञ्चनमुद्रिकाश्च मन्त्रेण हेम्नश्चषके निधाय ।
सीतापते ते पुरतश्श्रुतेस्तु प्रदध्युरेवं भगवत्स्वरूपम् ।। १५

**हिरण्यरूपस्सहिरण्यसंवृदगपान्नपात्सेदुहिरण्यवर्णः ।**
**हिरण्ययात्परियोने निषध्या हिरण्यदाददत्यन्नमस्मे ।। १६**

**वसिष्योत्तमवस्त्राणि भूषणैरप्यलङ्कुरु ।**
**कुर्वन्नुत्सवमत्यन्तमस्मदीयं मखं यज ।। १७**

**वसिष्यामि येध्रवस्त्राण्यूर्जापते सोमनो अध्वरं यज ।**
**आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।**
**मन्त्रेशैर्लोकपालैश्च सार्धं देवगणैः श्रिया ।। १८**

**त्रिकालपूजासुदयार्द्रदृष्ट्या मयार्पितं चार्हणमाशु स त्वम् ।**
**गृहाण लोकाधिपते रमेश ममापराधान् सकलान् क्षमस्व ।। १९**

**श्रीमत्सत्यप्रमोदार्यहृन्निवास्यनिलेशिता ।**
**सत्यज्ञानानन्तगुणः प्रीयतां बादरायणः ।। २०**

।। इति श्री सत्याधिराजतीर्थकृतं श्रीसत्यप्रमोदतीर्थोः सङ्गृहीतं आमन्त्रणोत्सवस्तोत्रम् सम्पूर्णम् ।।